# ॥ अवधूतोपनिषत् ॥
# || avadhūtopaniṣat ||

**Informazioni:**
Titolo: Avadhuta Upanishad
Nome file: avadhuta_upanishad
Categoria: Upanishhat, Svara, Devii, Annapurna
Locazione: http://www.culturavedica.org/sanscrito-sanskrit
Autore: Tradizione vedica
Linguaggio: Sanscrito
Soggetto: Filosofia/Religione/Induismo
Translitterazione: http://www.culturavedica.org
Correzione: http://www.culturavedica.org
Descrizione: 79 di 108, Krishna-Yajur-Veda, Sanyasa Upanishad
Ultima revisione: 12 maggio 2018
Accesso: http://www.culturavedica.org/pdf/avadhuta_upanishad
Mail: info@culturavedica.org
Font: Sanskrit 2003
Testo editabile disponibile: info@culturavedica.org

**© Quest'opera è stata digitalizzata e messa a disposizione da "CulturaVedica", può essere usata per la ricerca e lo studio personale. Non può essere usata (senza permesso) per scopo promozionale o commerciale.**

Aiutate a mantenere il rispetto e lo spirito del sito.

CULTURA VEDICA

# ॥ अवधूतोपनिषत् ॥

गौणमुख्यावधूतालिहृदयाम्बुजवर्ति यत् ।
तत्त्रैपदं ब्रह्मतत्त्वं स्वमात्रमवशिष्यते ॥
ॐ सह नाववतु ॥
सह नौ भुनक्तु ॥
सह वीर्यं करवावहै ॥
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
ॐ शान्तिः शान्तिः शान्तिः ॥
हरिः ॐ अथ ह सांकृतिर्भगवन्तमवधूतं दत्तात्रेयं
परिसमेत्य पप्रच्छ भगवन्कोऽवधूतस्य का स्थितिः किं
लक्ष्म किं संसरणमिति ।
तं होवाच भगवो दत्तात्रेयः परमकारुणिकः ॥
अक्षरत्वाद्वरेण्यत्वाद्धूतसंसारबन्धनात् ।
तत्त्वमस्यादिलक्ष्यत्वादवधूत इतीर्यते ॥१॥
यो विलङ्घ्याश्रमान्वर्णानात्मन्येव स्थितः सदा ।
अतिवर्णाश्रमी योगी अवधूतः स कथ्यते ॥२॥
तस्य प्रियं शिरः कृत्वा मोदो दक्षिणपक्षकः ।
प्रमोद उत्तरः पक्ष आनन्दो गोष्पदायते ॥३॥
गोपालसदृशां शीर्षे नापि मध्ये न चाप्यधः ।
ब्रह्मपुच्छं प्रतिष्ठेति पुच्छाकारेण कारयेत् ॥४॥
एवं चतुष्पथं कृत्वा ते यान्ति परमां गतिम् ।
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ॥५॥
स्वैरं स्वैरविहरणं तत्संसरणम् । सांबरा वा दिगंबरा वा ।
न तेषां धर्माधर्मौ न मेध्यामेधौ ।
सदा सांग्रहण्येष्ट्याश्वमेधमन्तयागं यजते ।
स महामखो महायोगः ।
कृत्स्नमेतच्चित्रं कर्म।
स्वैरं न विगायेत्तन्महाव्रतम् ।
न स मूढवल्लिप्यते ।
यथा रविः सर्वरसान्प्रभुङ्क्तेहुताशनश्चापि
हि सर्वभक्षः ।
तथैव योगी विषयान्प्रभुङ्क्ते
न लिप्यते पुण्यपापैश्च शुद्धः ॥६॥
आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥७॥
न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥८॥
ऐहिकामुष्मिकव्रातसिद्धै मुक्तेश्च सिद्धये ।
बहुकृत्यं पुरा स्यान्मे तत्सर्वमधुना कृतम् ॥९॥
तदेव कृतकृत्यत्वं प्रतियोगिपुरःसरम् ।
अनुसन्दधदेवायमेवं तृप्यति नित्यशः ॥१०॥
दुःखिनोऽज्ञाः संसरन्तु कामं पुत्राद्यपेक्षया ।
परमानन्दपूर्णोऽहं संसरामि किमिच्छया ॥११॥
अनुतिष्ठन्तु कर्माणि परलोकयियासवः ।
सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम् ॥१२॥
व्याचक्षतां ते शास्त्राणि वेदानध्यापयन्तु वा ।
येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः ॥१३॥
निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च ।
द्रष्टारश्चेत्कल्पयन्तु किं मे स्यादन्यकल्पनात् ॥१४॥
गुञ्जापुञ्जादि दह्येत नान्यारोपितवह्निना ।
नान्यारोपितसंसारधर्मा नैवमहं भजे ॥१५॥
श्रृण्वन्त्वज्ञाततत्त्वास्ते जानन्कस्माच्छृणोम्यहम् ।

# || avadhūtopaniṣat ||

gauṇamukhyāvadhūtālihṛdayāmbujavarti yat |
tattraipadaṃ brahmatattvaṃ svamātramavaśiṣyate ||
oṁ saha nāvavatu ||
saha nau bhunaktu ||
saha vīryaṃ karavāvahai ||
tejasvināvadhītamastu mā vidviṣāvahai ||
oṁ śāntiḥ śāntiḥ śāntiḥ ||
hariḥ oṁ atha ha sāṃkṛtirbhagavantamavadhūtaṃ dattātreyaṃ
parisametya papraccha bhagavanko:'vadhūtasya kā sthitiḥ kiṃ
lakṣma kiṃ saṃsaraṇamiti |
taṃ hovāca bhagavo dattātreyaḥ paramakāruṇikaḥ ||
akṣaratvādvareṇyatvāddhṛtasaṃsārabandhanāt |
tattvamasyādilakṣyatvādavadhūta itīryate ||1||
yo vilaṅghyāśramānvarṇānātmanyeva sthitaḥ sadā |
ativarṇāśramī yogī avadhūtaḥ sa kathyate ||2||
tasya priyaṃ śiraḥ kṛtvā modo dakṣiṇapakṣakaḥ |
pramoda uttaraḥ pakṣa ānando goṣpadāyate ||3||
gopālasadṛśāṃ śīrṣe nāpi madhye na cāpyadhaḥ |
brahmapucchaṃ pratiṣṭheti pucchākāreṇa kārayet ||4||
evaṃ catuṣpathaṃ kṛtvā te yānti paramāṃ gatim |
na karmaṇā na prajayā dhanena tyāgenaike amṛtatvamānaśuḥ ||5||
svairaṃ svairaviharaṇaṃ tatsaṃsaraṇam | sāṃbarā vā digaṃbarā vā |
na teṣāṃ dharmādharmau na medhyāmedhau |
sadā sāṃgrahaṇyeṣṭyāśvamedhamantayāgaṃ yajate |
sa mahāmakho mahāyogaḥ |
kṛtsnametaccitraṃ karma|
svairaṃ na vigāyettanmahāvratam |
na sa mūḍhavallipyate |
yathā raviḥ sarvarasānprabhuṅktehutāśanaścāpi
hi sarvabhakṣaḥ |
tathaiva yogī viṣayānprabhuṅkte
na lipyate puṇyapāpaiśca śuddhaḥ ||6||
āpūryamāṇamacalapratiṣṭhaṃ
samudramāpaḥ praviśanti yadvat |
tadvatkāmā yaṃ praviśanti sarve
sa śāntimāpnoti na kāmakāmī ||7||
na nirodho na cotpattirna baddho na ca sādhakaḥ |
na mumukṣurna vai mukta ityeṣā paramārthatā ||8||
aihikāmuṣmikavrātasiddhai mukteśca siddhaye |
bahukṛtyaṃ purā syānme tatsarvamadhunā kṛtam ||9||
tadeva kṛtakṛtyatvaṃ pratiyogipuraḥsaram |
anusandadhadevāyamevaṃ tṛpyati nityaśaḥ ||10||
duḥkhino:'jñāḥ saṃsarantu kāmaṃ putrādyapekṣayā |
paramānandapūrṇo:'haṃ saṃsarāmi kimicchayā ||11||
anutiṣṭhantu karmāṇi paralokayiyāsavaḥ |
sarvalokātmakaḥ kasmādanutiṣṭhāmi kiṃ katham ||12||
vyācakṣatāṃ te śāstrāṇi vedānadhyāpayantu vā |
ye:'trādhikāriṇo me tu nādhikāro:'kriyatvataḥ ||13||
nidrābhikṣe snānaśauce necchāmi na karomi ca |
draṣṭāraścetkalpayantu kiṃ me syādanyakalpanāt ||14||
guñjāpuñjādi dahyeta nānyāropitavahninā |
nānyāropitasaṃsāradharmā naivamahaṃ bhaje ||15||
śṛṇvantvajñātatattvāste jānankasmāñchṛṇomyaham |

| | |
|---|---|
| मन्यन्तां संशयापन्ना न मन्येऽहमसंशयः ॥१६॥ | manyantāṃ saṃśayāpannā na manye:'hamasaṃśayaḥ \|\|16\|\| |
| विपर्यस्तो निदिध्यासे किं ध्यानमविपर्यये । | viparyasto nididhyāse kiṃ dhyānamaviparyaye \| |
| देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहम् ॥१७॥ | dehātmatvaviparyāsaṃ na kadācidbhajāmyaham \|\|17\|\| |
| अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुम् । | ahaṃ manuṣya ityādivyavahāro vināpyamum \| |
| विपर्यासं चिराभ्यस्तवासनातोऽवकल्पते ॥१८॥ | viparyāsaṃ cirābhyastavāsanāto:'vakalpate \|\|18\|\| |
| आरब्धकर्मणि क्षीणे व्यवहारो निवर्तते । | ārabdhakarmaṇi kṣīṇe vyavahāro nivartate \| |
| कर्मक्षये त्वसौ नैव शामेध्यानसहस्रतः ॥१९॥ | karmakṣaye tvasau naiva śāmeddhyānasahasrataḥ \|\|19\|\| |
| विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तु ते । | viralatvaṃ vyavahṛteriṣṭaṃ ceddhyānamastu te \| |
| बाधिकर्मव्यवहृतिं पश्यन्ध्यायाम्यहं कुतः ॥२०॥ | bādhikarmavyavahṛtiṃ paśyandhyāyāmyahaṃ kutaḥ \|\|20\|\| |
| विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम । | vikṣepo nāsti yasmānme na samādhistato mama \| |
| विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः । | vikṣepo vā samādhirvā manasaḥ syādvikāriṇaḥ \| |
| नित्यानुभवरूपस्य को मेऽत्रानुभवः पृथक् ॥२१॥ | nityānubhavarūpasya ko me:'trānubhavaḥ pṛthak \|\|21\|\| |
| कृतं कृत्यं प्रापणीयं प्राप्तमित्येव नित्यशः । | kṛtaṃ kṛtyaṃ prāpaṇīyaṃ prāptamityeva nityaśaḥ \| |
| व्यवहारो लौकिको वा शास्त्रीयो वान्यथापि वा । | vyavahāro laukiko vā śāstrīyo vānyathāpi vā \| |
| ममाकर्तुरलेपस्य यथारब्धं प्रवर्तताम् ॥२२॥ | mamākarturalepasya yathārabdhaṃ pravartatām \|\|22\|\| |
| अथवा कृतकृत्येऽपि लोकानुग्रहकाम्यया । | athavā kṛtakṛtye:'pi lokānugrahakāmyayā \| |
| शास्त्रीयेणैव मार्गेन वर्तेऽहं मम का क्षतिः ॥२३॥ | śāstrīyeṇaiva mārgena varte:'haṃ mama kā kṣatiḥ \|\|23\|\| |
| देवार्चनस्नानशौचभिक्षादौ वर्ततां वपुः । | devārcanasnānaśaucabhikṣādau vartatāṃ vapuḥ \| |
| तारं जपतु वाक्तद्वत्पठत्वाम्नायमस्तकम् ॥२४॥ | tāraṃ japatu vāktadvatpaṭhatvāmnāyamastakam \|\|24\|\| |
| विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानन्दे विलीयताम् । | viṣṇuṃ dhyāyatu dhīryadvā brahmānande vilīyatām \| |
| साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये ॥२५॥ | sākṣyahaṃ kiṃcidapyatra na kurve nāpi kāraye \|\|25\|\| |
| कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः । | kṛtakṛtyatayā tṛptaḥ prāptaprāpyatayā punaḥ \| |
| तृप्यन्नेवं स्वमनसा मन्यतेसौ निरन्तरम् ॥२६॥ | tṛpyannevaṃ svamanasā manyatesau nirantaram \|\|26\|\| |
| धन्योऽहं धन्योऽहं नित्यं स्वात्मानमञ्जसा वेद्मि । | dhanyo:'haṃ dhanyo:'haṃ nityaṃ svātmānamañjasā vedmi \| |
| धन्योऽहं धन्योऽहं ब्रह्मानन्दो विभाति मे स्पष्टम् ॥२७॥ | dhanyo:'haṃ dhanyo:'haṃ brahmānando vibhāti me spaṣṭam \|\|27\|\| |
| धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्षेऽद्य । | dhanyo:'haṃ dhanyo:'haṃ duḥkhaṃ sāṃsārikaṃ na vīkṣe:'dya \| |
| धन्योऽहं धन्योऽहं स्वस्याज्ञानं पलायितं क्वापि ॥२८॥ | dhanyo:'haṃ dhanyo:'haṃ svasyājñānaṃ palāyitaṃ kvāpi \|\|28\|\| |
| धन्योऽहं धन्योऽहं कर्तव्यं मे न विद्यते किंचित् । | dhanyo:'haṃ dhanyo:'haṃ kartavyaṃ me na vidyate kiṃcit \| |
| धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वमत्र सम्पन्नम् ॥२९॥ | dhanyo:'haṃ dhanyo:'haṃ prāptavyaṃ sarvamatra sampannam \|\|29\|\| |
| धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके । | dhanyo:'haṃ dhanyo:'haṃ tṛpterme kopamā bhavelloke \| |
| धन्योऽहं धन्योऽहं धन्यो धन्यः पुनः पुनर्धन्यः ॥३०॥ | dhanyo:'haṃ dhanyo:'haṃ dhanyo dhanyaḥ punaḥ punardhanyaḥ \|\|30\|\| |
| अहो पुण्यमहो पुण्यं फलितं फलितं दृढम् । | aho puṇyamaho puṇyaṃ phalitaṃ phalitaṃ dṛḍham \| |
| अस्य पुण्यस्य सम्पत्तेरहो वयमहो वयम् ॥३१॥ | asya puṇyasya sampatteraho vayamaho vayam \|\|31\|\| |
| अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखम् । | aho jñānamaho jñānamaho sukhamaho sukham \| |
| अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः ॥३२॥ | aho śāstramaho śāstramaho gururaho guruḥ \|\|32\|\| |
| इति य इदमधीते सोऽपि कृतकृत्यो भवति । | iti ya idamadhīte so:'pi kṛtakṛtyo bhavati \| |
| सुरापानात्पूतो भवति । | surāpānātpūto bhavati \| |
| स्वर्णस्तेयात्पूतो भवति । | svarṇasteyātpūto bhavati \| |
| ब्रह्महत्यात्पूतो भवति । | brahmahatyātpūto bhavati \| |
| कृत्याकृत्यात्पूतो भवति । | kṛtyākṛtyātpūto bhavati \| |
| एवं विदित्वा स्वेच्छाचारपरो | evaṃ viditvā svecchācāraparo |
| भूयादोंसत्यमित्युपनिषत् ॥ | bhūyādoṃsatyamityupaniṣat \|\| |
| ॐ सह नाववतु ॥ | oṁ saha nāvavatu \|\| |
| सह नौ भुनक्तु ॥ | saha nau bhunaktu \|\| |
| सह वीर्यं करवावहै ॥ | saha vīryaṃ karavāvahai \|\| |
| तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ | tejasvināvadhītamastu mā vidviṣāvahai \|\| |
| ॐ शान्तिः शान्तिः शान्तिः ॥ | oṁ śāntiḥ śāntiḥ śāntiḥ \|\| |
| इत्यवधूतोपनिषत्समाप्ता ॥ | ityavadhūtopaniṣatsamāptā \|\| |